दिनाङ्क :- 26.07.2025

प्रातः - 06:55

प्रधानमन्त्री मालदीवः आगतः।

अद्य राजधान्यां माले-नगरे माल्दीव्स्-देशस्य स्वातन्त्र्य-दिवसोत्सवे प्रधानमन्त्री "गेस्ट ऑफ ऑनर" इति 'सम्माननीय-अतिथित्वेन भविष्यति। राष्ट्रपतिः मोहम्मद् मुइज़ु इत्यस्य विशेष-आमन्त्रणेन प्रधानमन्त्री माल्दीव्स्-देशस्य राज्ययात्रायाम् अस्ति। प्रधानमन्त्रिणा नरेन्द्रमोदिना द्विराष्ट्रयात्रायाः द्वितीये चरणे माल्दीव्स्-देशं गत्वा माल्दीव्स्-देशस्य राष्ट्रपतिना डा. मोहम्मद् मुइज़ु इत्यनेन सह मिलित्वा बहुविध क्षेत्रेषु सहयोगं वर्धयितुं षट् सहमति पत्राणि हस्ताक्षरितानि। इयं प्रधानमन्त्रिणः तृतीया यात्रा अस्ति, तथा च डा. मोहम्मद् मुइज़ु-वर्यस्य आध्यक्ष्ये इयं प्रथमा यात्रा । माल्दीव्स्-देशस्य राष्ट्रपतिः डा. मोहम्मद् मुइज़ू इत्येषः विमानस्थानके प्रधानमन्त्रिणः विशिष्टेन भावेन स्वागतं कृतवान् । प्रधानमन्त्री अवदत् यत् राष्ट्रपतेः एतेन भावेन सः गभीरतया स्पृष्टो अस्ति इति। सः अवदत् यत् भारत-माल्दीव्स् मैत्री आगामिकालेन प्रगत्या नूतनानि औन्नत्यानि साधयिष्यति इति। आकाशवाण्या सह संवादे माल्दीव्स्-देशे भारतस्य उच्चायुक्तः जी. बालसुब्रमण्यम् अवदत् यत् गतवर्षे राष्ट्रपतेः मुइज़ु इत्यस्य भारतयात्रायाः समये माल्दीव्स्-देशे रूपे-कार्ड् उद्घाटितम् आसीत् इति। सः सूचितवान् यत् माल्दीव्स्-देशे यू पी आई इत्यस्य सञ्चालनविषये अपि उभयपक्षौ गभीरं वार्तालापं कुर्वन्तौ स्तः।

तमिल्नाडु - पीएम

प्रधानमन्त्री नरेन्द्रमोदी अद्यारभ्य तमिल्नाडोः द्विदिवसीययात्रायाम् अस्ति। यू. के. माल्दीव्स् इत्येतयोः यात्रां समाप्य, श्रीमोदी साक्षात् तूटिकोरिन्-नगरं गमिष्यति। प्रधानमन्त्री अद्य रात्रौ तूटिकोरिन्-नगरे चतुः सहस्र-अष्टशत-कोटिरूप्यकाणां विविधविकासपरियोजनानां उद्घाटनं, समर्पणं, शिलान्यासं च विधास्यति। एते प्रकल्पाः क्षेत्रीय-सम्पर्कं महत्त्वपूर्णरूपेण वर्धयन्ति, स्वच्छ-ऊर्जा-मूलसौकर्यं सुदृढं कुर्वन्ति, निखिलस्य तमिल्नाडु-राज्यस्य नागरिकाणां जीवनस्य गुणवत्तां च वर्धयन्ति।

केन्द्रीय-गृह-मन्त्री - सम्मेलन

केन्द्रीय-गृह-मन्त्री अमितशाहः देशस्य विधि-प्रवर्तन-अभिकरणान् भयोत्पादक-कार्येषु अवैध कार्येषु च संलग्नान् पलायितान् पुनः आनेतुं समर्पित-उपायान् कर्तुम् निर्देशितवान्। श्री शाहः ह्यः नवदिल्ल्यां द्विवार्षिक-राष्ट्रिय-सुरक्षा-रणनीति-सम्मेलनस्य उद्घाटनानन्तरं भाषणं कुर्वन् आसीत्। । भौतिक-आभासीय-पद्धत्याः सम्मेलनमिदमायोजितम्।

## कारगिलविजयदिवस

नवदशाधिक द्विसहस्र तमे वर्षे कारगिलयुद्धकाले स्वप्राणस्य बलिदानं कृतानां भारतीयसैनिकानां शौर्यं सम्मानार्थं अद्य कृत्स्ने हि देशे कारगिलविजयदिवसः आचर्यते। अस्मिन् कार्यकाले, भारतीय-सशस्त्र-सेनाः जम्मू-कश्मीर्-प्रदेशयोः कारगिल-मण्डलस्य प्रदेशान् पुनः गृहीतवन्तः, येषु पाकिस्तानी-सैनिकैः भयोत्पादकैः च अन्तःप्रवेशाः आसन्।

## संसत्स्थगनम्

बिहारे विशेष-गहन-संशोधनेत्यादि- विविधविषयान् अधिकृत्य विपक्षस्य निरन्तरं विरोधकारणात् लोकसभायाः, राज्यसभायाः च गतदिनस्य कार्याचरणं स्थगितम्। लोकसभायां, कार्गिल्-विजय-दिवसस्य पूर्वसन्ध्यायां कार्गिल्-वीरेभ्यः श्रद्धाञ्जलिसमर्पणानन्तरं विपक्षस्य सदस्याः सदनकार्यजातं बाधितवन्तः, इमे नेतारः प्रमुखेषु विषयेषु चर्चां याचितवन्तः। अध्यक्षः ओम् बिरला-वर्यः तान् शिष्टाचारं धारयितुं प्रार्थयत्, परन्तु विरोधः अन्ववर्तत, प्रथमतया अपराह्ने द्विवादनपर्यन्तं कार्यजातं स्थगितम्, ततश्च दिनपर्यन्तम् एव कार्यजातं स्थगितम् ।